International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(4): 142-143
© 2020 IJSR
www.anantaajournal.com
Received: 19-05-2020
Accepted: 21-06-2020

**दिनेश**
विद्यावारिधिः, मीमांसाविभागः,
श्री.ला.ब.शा.रा.सं.वि., देहली,
भारत

**Corresponding Author:**
**दिनेश**
विद्यावारिधिः, मीमांसाविभागः,
श्री.ला.ब.शा.रा.सं.वि., देहली,
भारत

# पूर्वमीमांसादर्शने विधिचतुष्टयम्

## दिनेश

**प्रस्तावना**

वेदार्थनिर्णयार्थं प्रवृत्तं पूर्वमीमांसाशास्त्रम्।तत्र क्रमे विधिमंत्रनामनिषेधार्थवादभेदेन विचार्याणि वाक्यानि पञ्चधा विभक्तानि।तस्मिन् भेदे प्रथम प्रकारः विध्याखयः।सो हि विधिः चतुष्प्रकारकः उत्पत्तिविनियोगप्रयोगाधिकारभेदात्।स एवात्र विचार्यन्ते-

### उत्पत्तिविधि

येन वेदवाक्येन यागस्य कर्मस्वरुपमात्रस्य बोधः भवति स उत्पत्तिविधिर्भवति । यथा- 'अग्निहोत्रं जुहोति' इदं वाक्यम् अग्निहोत्रस्य स्वरुपमात्रबोधकत्वादुत्पत्तित्रिविधेरूदाहरणं भवति । केषुचित्स्थलेषु इमानि उत्पत्तिवाक्यानि कर्मणः स्वरूपस्य गुणस्य च, किन्तु एषा स्थितिः तत्रैव भवति यत्रोभयोः भिन्नं प्रापकं नोपलब्धं भवति।अतः अत्र मत्वर्थलक्षणया अस्य वाक्यस्य सोमवता यागेन इष्टं भावयेत् इत्येवंरूपोऽर्थः क्रियते।लौगाक्षिभास्करप्रभृतिभिः कतिपयमीमांसकैः अयं विधिरिति स्वीकृतमस्ति । किन्तु अस्य एतादृशोऽर्थः तदैव सम्भवति यदा कश्चिदन्यविकल्पः नोत्पद्यते । यतो हि मत्वर्थलक्षणायां कल्पनागौरवे वृद्धिः भवति अत एव अनन्यगतिका एव मत्वर्थलक्षणा स्वीकार्या भवति[1] ।

यागस्य द्वे रुपे स्वीक्रियेते- 1. द्रव्यम्, 2. देवता । एताभ्यमेव कर्मणः स्वरूपं निर्धारितः भवति । यद्यपि 'अग्निहोत्रं जुहोति' वाक्येन द्रव्यस्य देवतायाः वाऽपि स्मरणं न भवति।तथापि इदम् उत्पत्तिवाक्यं भवति।यतोऽस्य अग्निरूपदेवतायाः प्राप्तिः 'अग्निर्ज्योतिर्ज्योतिरग्निः' इत्यादिमन्त्रेण, द्रव्यस्य प्राप्तिश्च 'दध्ना ज्योति' इत्यादि गुणविधायकवाक्येन भवति । यदि अयं देवतादीनां प्रापकः विधिः स्वीक्रियते चेदस्य अपूर्वता खण्डिता भवति । यतः देवतादीनां प्राप्तिरन्येन वेदवाक्येन भवति, अनेन चात्र अप्राप्तार्थप्रापकता न सिध्येत । अतः इदम् उत्पत्तिविधेरुदाहरणं सिद्धं भवति । श्रीकृष्णयज्वा एवं कर्मोत्पत्तिविधिं वक्ति ।

### विनियोगविधि

यः अपूर्वविधिः अङ्गभूतकर्मणः सम्बन्धं प्रधानकर्मभिः सह प्रतिपादयति सः विनियोगविधिः भवति । अर्थात् अनेन वाक्येन अयं बोधः भवति यत् होमरूपप्रधानकर्मणः अङ्गं दधिः भवति । अत्र दध्नः विधेयत्वात् तस्य अङ्गता बोध्यते ।

'अग्निहोत्रं जुहोति' इत्यनूदितहोमस्योद्देष्यभूतत्वात् होमकर्मणः प्रधान्यं ज्ञायते । वस्तुतः कर्मोत्पत्तिविधौ च तृतीयादिश्रुतिसंयुक्तानि द्रव्यादीनि एव कारणानि भवन्ति, तानि च धात्वेर्थेन सह करणत्वेन अन्वितानि भवन्ति । देवतादीनुद्दिश्य अग्नयादौ आधारे द्रव्यस्य प्रक्षेपणमेव यागः करणत्वेन अन्वितानि भवन्ति । देवतादीनुद्दिश्य अग्नयादौ आधारे द्रव्यस्य प्रक्षेपणमेव यागः भवति।कतिपयस्थलेषु अस्य धात्वार्थस्यान्वः आश्रयरूपेण क्रियते । यथा- 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यादि वाक्येषु दधिकरणत्वेन इन्द्रियं भावयेत् इत्यर्थबोधः भवति । अत एवात्र इन्द्रियसमृद्धं फलमुद्दिश्य दधिकरणत्वेन इन्द्रियं भावयेत् इत्यर्थबोधः भवति । अत एवात्र इन्द्रियसमृद्धं दधिरूपसाधनेन होमस्य विधानं प्राप्तं भवति । अत्र दधिकरणता होमेन सह आश्रयरूपसम्बन्धेन एव सिद्धा भवति । दध्यादीनामेषा अङ्गता तेषां परार्थ्यतायाः कारणेन अस्ति । यथैव जैमिनिनोक्तमस्ति – "शेषः परार्थत्वात्" इति । अत्र परार्थतायाः तात्पर्यम् अन्यस्य स्वरूपसिद्धौ येषां प्रयोजनं भवेत् तादृग्द्रव्यादिभिरस्ति । "दध्ना जुहोति" इत्यादिवाक्येषु दध्यादीनां प्रयोजनं परार्थमर्थात् होमादीनां स्वरूपसिद्धये अस्ति । अतः दधिः होमस्य अङ्गं सिध्यती ।

मीमांसादर्शने प्रधानयागस्य निष्पत्तये अनेकानामङ्गनां तेन सह समन्वयं कर्तुं श्रुति, लिङ्ग , वाक्य , प्रकरण, स्थान, समाख्या इति षट् प्रमाणानि प्रतिपादानि सन्ति । एकस्मिन् स्थले एकेनैव प्रधानेन सह भिन्नप्रमाणैः विभिन्नप्रकारकविनियोगानां प्राप्तौ सत्यां , पूर्वक्रमिकानां प्रमाणानां पश्चात् उल्लिखितेभ्यः प्रमाणेभ्यः प्राबल्यं मत्वा तैः प्रतिपादितः विनियोगः एव स्वीक्रियते । यथा श्रुतिप्रमाणस्य उल्लेखः सर्वात् पूर्वम् अस्ति । अतः तत् सर्वप्रमाणेभ्यः बलीयः समाख्या च सर्वप्रमाणपश्चाद्वर्तित्वात् दुर्बलं स्वीक्रियते । "कदाचन स्तरीरसी नेन्द्र सश्चासि दाशुषे[2]- अर्थात् हे इन्द्र त्वं हविर्दातारं पातुं सदैवायासि न जातु घातयितुमिति । अस्या ऋचायां इन्द्रशब्दस्य उल्लेखात् ईयम् ऐन्द्री ऋचा उच्यते । अत्र ऋचा इन्द्रस्योपस्थाने अङ्गरूपेण समन्विता स्यात् इति लिङ्गप्रमाणस्य प्रतिपादनमस्ति परन्तु श्रुतिर्लिङ्गात् बलीयसी भवतीत्यतः "ऐन्द्र्या गार्हपत्यमुपतिष्ठते[3] इति श्रुतिप्रमाणेन उक्ता ऋक् गार्हपत्योपस्थाने विनियुक्ता भवति। लौकिकपृष्ठभूमौ प्रमाणानामिदं बलाबलं अवराधिकारिभ्यः वरिष्ठाधिकारिणां स्वभाविकाधिरबलस्य प्राबल्यं द्योतयति । विवेचितेन बलाबलाधिकरणन्यायेन लोके यत्र वरिष्ठाधिकारिणां प्रबलतायां लोकोपयोगी पक्षः प्रकाशितः भवति तथैव शिष्टोपाधिकरणे लघीयाधिकरिणः अपि आत्मनः बलवद्भ्यः प्रबलाधिकारयिभ्योऽधिक प्रबलतायाः पक्षः उद्घाटितः भवति ।

## प्रयोगविधि

अनुष्ठाने शीघ्रतां सम्पादयन्ती विधिः प्रयोगविधिः भवन्ति । वस्तुतः अङ्गभूतवाक्यैः सह महावाक्यतां प्राप्तः प्रधानविधिः प्रयोगविधिरेव । समस्ताङ्गविशिष्टस्य प्रधानयागस्य प्रयोगरूपेण विधायकत्वात् अयं प्रयोगविधिरित्युच्यते । यद्यपि अङ्गभूतवाक्यैः सह एकवाक्यतां प्राप्तः प्रधानविधिः साहित्यस्य विधानं करोति तथापि तेषां कर्मणाम् एककालानुष्ठेयतायाः सम्भवे न सति अविलम्बेन तेषामनुष्ठानस्य विधानं प्रयोगविधेः कार्यमस्ति । अयम् अविलम्बः नियतक्रमस्याश्रितः भवति , यतः नियतक्रमस्य आश्रये न कृते कस्यानन्तरं किं कर्म सम्पाद्यमिति भ्रमः वर्तिष्यते । अत एव स्वविधेयभूतकर्मणः प्रयोगप्राशभावसिद्धये प्रयोगविधिरेव पदार्थस्य विशेषणरूपेण नियतक्रमस्यापि विधानं करोति । अतोऽयम् अङ्गताबोधकक्रमविधिरित्युच्यते ।

## अधिकारविधि

स्वर्गदिफलानां स्वामितायाः बोधकः विधिः अधिकारविधिः भवति । कर्मजन्यफलस्यभोक्तृत्वं फलस्वामितायाः तात्पर्यं भवति । यथा – "स्वर्गकामो यजेत" इति वाक्ये स्वर्गमुद्दिस्य यागविधानं प्राप्तये अतः स्वर्गकामीपुरुषस्य यागजन्यफलभोक्तृता उच्यते । वस्तुतः अधिकारिणः विशेषणेन विशिष्टपुरुषस्यैव फलस्वामित्वं भवति । अतः "राजा राजसूयेन स्वाराज्यकामो यजेत" इति वाक्येन क्षत्रीयराजा एव स्वाराज्यकामाः राजसूययागस्याधिकारी भवति नान्ये ब्राह्मणादयः इति । वस्तुतः काम्यकर्मसु स्वर्गादिफलानां कामना नैमित्तिककर्मसु अग्निदाहादिरूपनिमित्तस्य निश्चयः, नित्यकर्मसु च पवित्रतापूर्वकं जीवनमापनस्याधिकारिणः विशेषणरूपेण प्रयुक्ताः भवन्ति । एवमेव भिन्न-भिन्न क्रियाणाम् अनुष्ठानस्य सामर्थ्यमपि "आख्यतानमर्थं ब्रुवता शक्तिः सहकारिणि" इति न्यायेन भिन्नकालानुष्ठेय कर्मसु पुरुषस्य विशेषणं भवति । अनुष्ठानसमर्थस्यैव पुरुषस्य स्वामित्वं सम्भवं भवति , असमर्थस्य न हि ।

## संदर्भ सूची

1. अतश्च विष्टाविधाविव गुणविधावप्यस्त्येव मत्वर्थलक्षणेति चेन्मैवम् । गुणानन्वयानुपपत्या मत्वर्थलक्षणा अङ्गीक्रियते । मी.न्या.पृ.३५
2. मी.न्या.प्र.पृ.८५
3. मै.सं.१/५/११